National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 62-64
© 2026 NJHSR
www.sanskritarticle.com

**Alpana Paul**
Research scholar
Dept. of Research and Publication,
National Sanskrit University,
Tirupati, A.P.

**Correspondence:**
**Alpana Paul**
Research scholar
Dept. of Research and Publication,
National Sanskrit University,
Tirupati, A.P.

# आधुनिकसंस्कृतसाहित्येतिहासे डा. निरञ्जनमिश्रस्य योगदानम्

**Alpana Paul**

- **प्रस्तावना -**

विंशतिशताब्दौ एकविंशतिशताब्दौ च स्वीयरचनाभिः संस्कृतसाहित्यम् अलङ्कृतवत्सु विद्वत्तल्लजेषु साहित्यकारेषु कविषु डा. निरञ्जनमिश्रस्य नाम सगौरवं सादरं ससम्मानं च स्वीकर्तुमर्हामः।महतोऽस्य विदुषः कवेर्वा सरसा वाणी, तदीया च प्रतिभासम्पन्ना लेखनी न केवलं संस्कृतसाहित्ये आत्मनं कीर्तिमन्तं कुरुते, अपि तु संस्कृतेतरभाषास्वपि विशिष्टं स्थानं बरीभर्ति।

साहित्यं समाजस्य दर्पणत्वेन परिचीयते। अयं सम्पूर्णः समाजः तादृशरूपेण दृश्यमानो भवति,यादृशरूपेण एकः कविःवाञ्छति। यथा अग्निपुराणे उल्लिखितमस्ति यत् –

साहित्यं समाजस्य दर्पणत्वेन परिचीयते। युगद्रष्टा साहित्यकारः सामाजिकव्यवहारं निशाम्य , स्वीयलेखन्याः प्रतिभाबलेन तं सामाजिकव्यवहारं साहित्ये परिवर्तयति। अयमपि निरञ्जनमिश्रः ईदृशं परिवर्तनं तद्विरचितरचनासुल स्थापयमासः। स्वस्य व्यक्तित्वमाध्यमेन वहुविकल्पात्मकरचनामाध्यमेन च अस्मिन संस्कृतसाहित्ये आत्मानं प्रतिष्ठतमकार्षीत्।अयं सम्पूर्णः समाजः तादृशरूपेण दृश्यमानो भवति,यादृशरूपेण एकः कविःवाञ्छति। यथा अग्निपुराणे उल्लिखितमस्ति यत् -

**अपारे काव्यसंसारे कविरेकः प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते।।**[1]

अस्य अपारकाव्यसंसारस्य निर्माता भवति कवि। तत्र काव्यामृतकस्सारे कविः एव प्रजापतित्वेन परिगन्यते। सम्पूर्णाः अपि समाजः तादृशरूपेण एव परिवर्तयितुं शक्यते, यादृशरूपेण कवि परिवर्तयितुमीहते। अनेनैव कारणेन कवेः सृष्टिर्विधातुः सृष्टेरपि श्रेयस्करी भवति ,तथा च कविः व्रह्मणः अपि श्रेष्टतम् इति आचार्यमम्मटः ब्रवीति –

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।**
**नवरसरुचिरां निर्मीतिमादधती भारती कवेर्जयति।।**[2]

- **कविपरिचयः –**

संस्कृतसाहित्ये नवीनं योगदानं कुर्वताम् आधुनिककवीनां मध्ये प्रतिष्टितस्य डा. निरञ्जनमिश्रस्य साहित्यं स्वयमवे तस्य परिचयं प्रस्तौति।यथा –

- **जन्मस्थानं परिवेशश्च –**

विहारप्रदेशस्य भागलपुरमण्डलस्य भ्रमरपुरग्रामे काश्यपगोत्रीये बाह्मणवंशे डा. निरञ्जनमिश्रस्य जन्म १९६६ तमे वर्षे जानुयारीमसस्य द्वितीय दिनाङ्के अजायत।[3] कवेरस्य पितृपादः स्व. सुखदेवमिश्रना-मधेयः, माता च स्व. भवानीदेवीनामधेया।

डा. निरञ्जनमिश्रस्य रचनात्मकं लेखनं तु वाल्यकालादेव दरीदृश्यते स्म। पितृपादः स्वयमेव साहित्ये रूचिं प्रादर्शयदित्यतः तस्य बाल्ये अपि साहित्यस्य प्रभावः संलक्ष्यते स्म।

डा. मिश्रस्तु स्वल्पायुष एव लेखनम् अध्ययनं च स्वीयाधारत्वेन अकल्पयत। तस्यसैव आधारः अद्य कविकल्पवृक्षवत् प्रस्फुटित जातः। भारतीययपरम्परायां वंशो द्विधा विभज्यते- विद्यया जन्मना च । अयं मिश्रवरः उभाभ्यामपि वंशाभ्यां पूर्णः आसीत । तस्य उभावपि वंशौ महान्तौ भवतः। स च महान् ज्ञानपिपासुः शौशवाद् एव सारस्वतसाधनाय जीवनं समर्पयामास। तदीयं सारस्वतसाधनं ज्ञानसमृद्ध्यर्थं सहायकभूतमासीत्। तदर्थं तस्य परिश्रमः अद्यः काव्यसङ्गहेषु काव्यकलेवरेषु च देदीप्यते।

त्रिपञ्चाशद्वर्ष यावत् स मिश्रनामकः कविः नैकेषां ग्रन्थानां प्रणेता, सम्पादकश्च आसीत्। तदातिरिक्तापि शतशः शोधपत्राणि, कविसम्मेलनानि, कविसङ्गोष्टश्च अकार्षीद् अयं कविः।

अध्ययनम् –

कविः पारम्पारिकपद्धत्या संस्कृताध्ययनं कृतवान। सः दरभङ्गा-आदर्शसंस्कृतमहाविद्यालयतः १९८६ तमे वर्षे शास्त्री, कामेश्वरसिंह-दरभाङ्गा-संस्कृतविश्वविद्यालयतः १९८८ तमे वर्षे आचार्योपाधिं प्राप्तवान्, अनन्तरं १९९०, विद्यावारिधी इति उपाधिं च प्राप्तवान्। वर्तमानसमये स हरिद्वारस्य श्री भगवामदास-आदर्श-संस्कृत-महाविद्यालये साहित्यविषये सहाचार्यत्वेन नियुक्तः अस्ति।

**आधुनिकसंस्कृतसाहित्ये तस्य योगदानम् –**

वर्तमानसमये जीवत्सु साहित्यकारेषु अस्य कविवरस्य नाम सगोरवं स्वीक्रियते इति निश्चप्रचम्। सः संस्कृतकाव्यानि बहु प्रकारेण प्रस्तुतवान् अस्ति। महाकाव्यषु, खण्डकाव्यषु, नाट्येषु नवगीतेषु,च तस्य योगदानं सुष्टरुपेण प्रकाशते।

कवेः कृतिनाम् –

**गङ्गापुत्रावदानम्-**

एतत् त्रयोविंशतिसर्गेषु विभक्तं महाकाव्यम् अस्ति। गङ्गायाः अविरलतां निर्मलतां च रक्षणार्थं कर्मवीरः गङ्गापुत्रः स्वामी श्रीनिगमानन्दस्य चरितं वर्णितमस्ति। कविना परीलक्षतं यत् पर्यावरण्य दूषणेण समाजः ग्रस्तः वर्तते। अतः कविः प्राकृतिकविहङ्गमदृशैः सहः गङ्गायाः अविच्छन्नजलधारायाः महत्त्वमपि अदीदृशत। पर्यावरणवविषयकवैचाकचिन्तनं, भ्रष्टाचारं, क्षेत्रवादं, जातिवादं. अनैकान्तिकवादम् एतानि सर्वाणि देशं मृत्युमुखे पातयति। राष्ट्रयप्राकृतिकचेतनायाः पर्यावरणसंरक्षणस्य च प्रेरणा महाकव्ये अस्मिन् प्रत्येकेषु विविधेषु सर्गेषु छन्दःसु वर्णिता वर्तते।

अस्मिन् काव्ये मुख्यपात्रत्वेन स्वामी- निगमानन्दः कविना उपस्थापितः। स्वेच्छया कविः महाकाव्ये अस्मिन् प्रकृतेः संरक्षणाय स्वामीनः निगमानन्दस्य आत्मबलिदानस्य जीवनगाथां वर्णयाञ्चकार। महाकाव्ये अस्मिन् शान्तरसस्य धर्मवीररसस्य च प्रधनता विद्यते। गुणेषु प्रसादगुणस्य माधुर्यगुणस्य च आधिक्यं परिलक्षिते। अनुप्रास-रूपक-यमक-उत्पेक्षादिभिः अलङ्कारैः अलङ्कृतं वर्तते इदं काव्यम्।

प्रकृतेः संरक्षणाय संरक्षणं संवर्धनं च आधारिकृत्य काव्यमिदं रचयाञ्चकार। प्रकृतेः हानिः अस्माभिः न कर्तव्या । यतो हि अस्मद् जीवनं प्रकृतौ एव अनुभूयते। कविना महाकाव्ये अस्मिन् भावाभिव्यक्तीकरणमिदं प्रस्तुत्य नः दिगुन्मुखीकरणाय प्रयासं कृतवान्। महाकाव्यस्यास्य प्रारम्भे उत्तराखण्डे नद्युपकूलभूतक्षेत्रा-दारभ्य नगाधिराजहिमालयस्य सुरम्यानां कूटानां विषये वर्णयाञ्चकारः तथैव मोक्षनगरीस्थहरीद्वारे आध्यात्मिक - लौकिकैतिहासिक-विषयकवर्णनायाः महाकवे अस्मिन् स्तुतिरपि विहिता। अथः हरिदारस्थं मातृसदनं, स्वामिजिनः व्यतीतबाल्य-कालाध्ययनैः समम् आध्यात्मिकचिन्तनं तथा प्रारब्धकर्मणा हरिद्वारं समागत्य गुरूशिवानन्द-पुज्यपादानाम् अभ्याशादीक्षाग्रहणा-दिविषया सुष्ठरूपेण महाकाव्ये अस्मिन् वर्णयाञ्चक्रुः।

स्वामिजिनः गङ्गादोहनविषये चिन्तनरतत्वं तथास्य अवैधखननाञ्छासनप्रसासनेन एव्रञ्च भुपतिभिः सह शान्ता विरोधः अपि परिलक्षते किञ्च स्वस्य हृदये चुकूलितगङ्गायाः खननेन दुःखितमनस्कीभूय ऊपरत्या साकं, साशनप्रशासनस्य कुचक्रेण उपरतिवेलायामेव स्वामिपादानां बलिदानसमो मृत्युः प्राप्तम्।

**गङ्गासदा भवतु तुङ्गतरङ्गमाला-**
**लीलावती नवलचञ्चलबालिकेव ।**
**तद्रोधकात्मकदलनाय गृहे अस्मिन् -**
**देशे भवन्तु बलिनः कृतिनश्च पुत्राः।।**

**ग्रन्थिबन्धनम् –**

षोडशसर्गेषु विभक्तमिदं महाकाव्यं वर्तमानकालस्य साम्प्रतिक-विषयं कन्याधनं आधारीकृत्य लिखितमस्ति। स्वीयकल्पनाप्रतिभया नायकस्य नायिकायाः स्थानस्यापि चयनं चकार। महाकाव्ये अस्मिन् नायकस्य शुभङ्गरस्य नायिकायाः सुकन्यायाः प्रेमप्रसङ्गात् आरभ्यः विवाहपर्यन्तं वर्णना प्राप्यते। समाजजनैः प्रभावितौ नायकस्य पितरौ विवाहे कन्याधनं स्लीकर्तुम् उद्युक्तौ अभवताम्। परन्तु तपोवनवासी नायिकासखी नायकं कन्याधनप्रथायाः दूष्परिणामविषये अवादीत्। एवञ्च कन्याधनम् ऋणस्वरूपमित्यपि कथयन्ती इमां कन्याधनंविना विवाहम् अकरोत्। कन्याधनं विना पुत्र्याः विवाहः सञ्जातः तेन पिता सन्तुष्टः अभवत्। अनेन प्रकारेण अस्य महाकाव्यस्य समाप्तिः प्राप्ता। समाजे कन्याधनप्रथायाः दूरीकरणमेव अस्य महाकाव्यस्य मुख्यमुद्देश्यमासीत्। यथा –

**अर्थस्य लौल्यं वचनं खलानां कुतर्कसिद्धस्य च साधुवादः।**
**चलन्मनश्चंकुरिता च शङ्का सर्वे शुभाशीरपि घातयन्ति।।**[4]

**दामिनी –**

दामिनी एकः उपन्यासः अस्ति। यं सहृदयानां गद्यकाव्यस्य आनन्दं जनयति। अस्मिन उपन्यासे वर्तमानसमाजस्य एवं प्राचीनसमाजस्य मिश्रणं दृश्यते। अस्य गद्यकाव्यस्य मुख्यविषयः नारीसम्मानस्य प्रतिष्टापनम् अस्ति। लेखकः दर्शयति यत् समाजस्य प्रगतेः मूलधारः नारी एव अस्ति। यदि नारी सुरक्षिता अस्ति, शिक्षिता, सम्मानिता च अस्ति तर्हि राष्ट्रस्य उन्नतिः स्वयमेव भवति।

**केदारघाटी विधवा वभूव –**

२०१३ तमे वर्षे भीषणप्राकृतिकप्रलयेन केदारघाट्याः याः स्थितिः अभवत, सा सर्वविदिता एव। तस्या आधारेण कविः लघुकाव्यं केदारघाटीविधवा वभुव अरचयत। हिमालयस्य रक्षयिता अयं केदारघाटी। अस्मिन् काव्ये कविः उत्तराखण्डस्य चिरस्मरणीयां केदारघाटिनः दैवीयविपदम् अववर्णत्। एषा घटना न कदापि विस्मर्तुं शक्यते। अनया घटनया अखिलं विश्वं रूरोद।

उत्तराखण्डे जुनमासस्य 16-17 तमे दिनाङ्के या विपद् समागता तया अखिलविश्वजनानाम् चक्षु अश्रुयुतं भूयते। अस्मिन् जगति एव कः अपि यः अनया घटनया मर्माहतः नाभवत्। तेषां मनःस्थितिः काव्ये वर्णितेन एकेन श्लोकेन ज्ञातुं शक्यते । तद्यथा-

**केदारनाथ-पद-पद्म परागलुब्धा-**
**भृङ्गाहरिद्वनरसं सरसं पिबन्ति।**
**नाट्येश्वरस्य नटने जयकीरघोषैः-**
**सङ्गीतसाधनविधौ सफला भवन्ति।**

भगवतः शङ्करस्य ज्योतिर्लिङ्गस्य पूजा जैष्टमासात् आरभ्य कार्तिकमासपर्यन्तं साडाम्बरं भवति। न केनापि चिन्तितं यत् प्रकृतेः क्रुरता एतादृशी भवतुमर्हति। विपर्यये बहवः जनाः गताः तेषां आगमनप्रतीक्षा अद्यवधि अपि गृहस्थैः जनैः क्रियतेः।

कविः प्रलये अस्मिन् दिवङ्गतानां जनानाम् आत्मसन्तुष्टये श्रद्धाञ्जलिरूपेण काव्यमिदं समर्पयाञ्चकार। प्रलयसमये घटितानां घटनाः कविः अवर्णयत् अस्मिन् काव्ये । तथाहि-

**शवं स्वपुत्रस्य निधाय हस्ते यतस्ततो गच्छति कश्चिदत्र।**
**निष्प्रणमातुर्वदने च कश्चिच्छिशुःस्तनादावाञ्छति दुग्धधाराम्।।**

**कवेः अन्यकृतयः –**

सिद्धाश्रमः, चन्द्रप्रभा, वीरभद्रः, भोकालः, नाट्यवाटिका, वन्देभारतम्, ग्रामशतकम् आमोदतरङ्गिणी, अरण्यरोदनम्, गीतावल्लरी, कुटजकुसुमम्, मनोहरकथावली, बाला-विलासम्, सुभगा-चरितम्, गृहिणीशतकम् , चमचा-शतकमश्चेति।

**कविना प्राप्ताः पुरस्काराः –**

गङ्गापुत्रावदानम् अस्य महाकाव्यस्य कृते अयं कविः साहित्य एकादमीपुरस्कारेण सम्मानितः।पुनश्च अस्यैव कृते उज्जैनतः कालिदासपुरस्कारः, दामिनी उपन्यासार्थं लखनऊतः वाणभट्ट-पुरस्कारेण सम्मानितः। उत्तराखण्ड- संस्कृत-विश्वविद्यालयः, हरिद्वारः इति संस्थाया समस्यपूर्तौ प्रथमं स्थानं प्राप्तम्। तथा च राष्ट्रिय-संस्कृत-अकादेमी, दिल्ली इति संस्थया अपि सम्मानितासन्।

**निष्कर्षः –**

सः अयं कविः काव्यसृजनस्य प्राचीनपरम्परां नवीकृत्य, तत्र सरलतां रोचकतां सरसतां च संस्थाप्य नवीकृतकाव्यरूपेण प्रास्वावीत। एतद्विरचितैः गद्यपद्यगीतकवितादिभिः संस्कृतानुरागिणः सर्वे अपि सन्तोषम् आनन्दं च सरलतया प्राप्नुयुरिति विषयः अयं सुचारूतया मनसि संस्थाप्यते।

**उल्लेखग्रन्थपञ्जिः**

1. अग्निपुराणम् -३९९/१२
2. आचार्यमम्मटकृतकाव्यप्रकाशः – १/१
3. डा. निरञ्जनमिश्रकृतं गङ्गापुत्रावदाने महाकाव्यम्, बाह्यपृष्टम्
4. ग्रन्थिबन्धम् - ५/९५
5. केदारघाटी-1/5
6. केदारघाटी-1/50
7. गङ्गापुत्रावगानम् महाकाव्यम् -23/55

**सन्दर्भग्रन्थसुचीः**

1.डा. निरञ्जनमिश्रः, गङ्गापुत्रावदानम्, मातृसदनम् प्रकाशनम्, 2013।
2.भारतवर्षे आधुनिकसंस्कृतसाहित्यम्,शुभ्रजित सेन, संस्कृतपुस्तक-भाण्डार, कोलकाता, 2019।
3.दामिनी, निरञ्जनमिश्र, सत्यम् प्रकाशनम्।
4.मिश्रः, निरञ्जनः,ग्रन्थिबन्धनम् नवी दिल्ली, सत्यम् प्रकाशनम्, 2024।
5.मिश्रः,निरञ्जनः, केदारघाटी विधवा बभूव, दिल्लीः प्रगतिशील प्रकाशनम्, 2014।

**पाद टिप्पणीः**

[1] अग्निपुराणम् – ३९९/१२

[2] आचार्यमम्मटकृतकाव्यप्रकाशः – १/१

[3] डा.निरञ्जनमिश्रकृतं गङ्गापुत्रावदानम् महाकाव्यम्, बाह्यपृष्ठम

[4] ग्र.ब. – ५/९५